# समर्पण

ॐ नमः शिर्गुलाय च मयोभवाय च।
नमः शङ्कराय च मयस्कराय च।
नमः शिवाय च चूडेश्वराय च।।
सच्चिदानन्दरूपाय भक्तानुग्रहकारिणे।
मायानिर्मितविश्वाय शिर्गुलाय नमो नमः।।
शिर्गुल! शङ्कर! हर! गिरिजेश!
शम्भो! पशुपते! श्रीचूडेश!
नान्या गतिर्मम त्वां विहाय
प्रभो! मयीमां करुणां कुरुष्व।।
नृपभूकडूः पिता यस्य दुदमा जननी तथा।
शाया जन्मस्थली यस्य भ्राता तु विजटः स्मृतः।।
यस्योग्रदिव्यतपसो महनीयभूमिः
श्रीचूडधार इति या प्रथिता पुराणी।
गन्धैः मनोहरसुखैश्चिडदेवदारु–
वृक्षैर्वनं परिविभाति धराधराणाम्।।
यस्य कृपां विना पूर्णं मनोभिलषितं न हि।
तस्मै दिव्यमिमं ग्रन्थं शिर्गुलाय समर्पये।।